# अनन्ताकाशस्य त्रिस्तरसम्बन्धि वेदविज्ञानम्

**Birendra Singh**

Guru Charan College, Silchar, Assam (India)

***Abstract***

*Science means valid knowledge of observations based on truth. The vedas are highly dealt with the observations of true entities of the universe.*

*The vedas deal with the observations of Bhuh (earthly concern) Bhuvah (interior space) and Swah (Highest space). There are differences in the observations of the entities of the three stages of space. But there are certain common truths of observations from which we can accquire a valid knowledge (i.e science). The Rgveda Samhita highly concerns to the reference of Rodashi, Dyava Prithivi, etc involving the three stages of space.*

*Later vedic texts and puranas are concerned to Sapta Swargas (Seven heavans) and Sapta Patalas (seven Netherlands) with their entities which are, of course, relative to vedic science which is the root of all sciences, developed in different Bhuvans. The Physical worlds are affluenced and pervaded by the eternal space and are led by eternal time. How these occur, how world's populations are grown up and how these can be removed - all these things would be dealt in with paper through the view points of vedic lores and puranas.*

वेदो ज्ञानमेव सत्ता वा भवति। विज्ञानमुभयसम्बन्धि। वेद एव विवर्त्तमानायाः सृष्टेरादिर्भवति। अतो विज्ञानमूलं तत्रैव निहितम्।

विज्ञानं विशेषज्ञानम्वा सृष्टेः प्रतीतीनां साधरणतोऽनुधावनं कार्यकारणत्वेन विवेचनमज्ञातानां सूक्ष्मत्वेन स्थितानामुद्भावनं तथा सृष्टेषु विशेषतः मनुष्येषु तेषामुद्भावितानामुपयोगीकरणं भवति।

द्वयं विज्ञानस्य भित्तिस्थलम्- १) अनन्तकाल: (Eternal time) २) अनन्तावस्थानञ्चेति (Eternal space)। एकः पचति; अन्यत् पच्यमानं भवति। उभयोर्मूलं सत् सन्मात्रम्वा भवति। अनन्तावस्थानमनन्ताकाशम्वा अत्र प्राधान्येनालोचनीयम्।

ऋषीणां देवानां पितॄणां नृणां तिर्यग्योनीनां परस्पर-भावनाप्रधान्याद् वेदस्य पञ्चमहायज्ञप्रसङ्गः प्राधान्येन प्रतीयते। तत्तु गीतायामपि समर्थितम्-

देवान्भावयतानेन ते देवा भावयन्तु वः।

परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।।[1]

यत्तु भूलोके नृतिर्यग्योनीनां, भुवर्लोकेऽन्तरिक्षे वा पितॄणां, स्वर्लोके देवानां साधरणतो निवसनं भवति। एतेषां परस्परः सम्बन्धोऽस्ति। पक्षान्तरे जनतपःसत्यलोकेषु सप्तर्षीनां चतुर्णामूर्द्धरेतसां तथा च त्रिदेवानां निवसनं क्रमश ऊर्द्धतः परिकल्पनमनन्ताकाशे सम्बध्यते। ऋक्संहितायां-हिरण्यगर्भ-विष्णु-पुरुष-सूक्तेषु, यजुः संहितायां रुद्राष्टाध्यायेषु सत्यलोकस्थानां त्रिदेवानां प्रसङ्गो लक्षणीयः।

अनन्ताकाशे भूर्भवःस्वरिति जनतपःसत्येति विभागयोर्मध्ये तु महलोकोऽदितिलोको वा द्यौ वा द्यावेति नाम्ना तिष्ठति यत्र कश्यपादीनां प्रजापतीनां स्थितिः। द्यावा स्वर्गादपि ऊर्द्धं परिकल्पिता वेदेषु सर्वत्र परिगणिता च। सप्तस्वर्गेषु महाकाशस्य त्रयस्तराः परिकल्पिताः। लोकेऽस्मिन् व्यक्ताव्याक्तानां व्यावहारिकं स्थूलविज्ञानं सूक्ष्मविज्ञानं चेति विज्ञानावस्थानद्वयमस्ति। भिन्नलोकगतासु अर्थात् भूलोकगतानां, भुवलोकगतानां, स्वर्लोकगतानां चोपादानयुतासु स्थूलप्रतीतीषु पार्थक्यं भेदत्वं वा प्रतिभाति। परन्तु सूक्ष्मविज्ञानतस्तेषामभेदत्वपृथक्त्वाम्वा भवति। तदेव सत्यम् सत्यं हि सर्वविज्ञानमूलम्।

स्थूलविज्ञानं पञ्चमहाभूतसम्वन्धि। प्रत्येकस्यापि महाभूतस्यातिक्षुद्रतमे परमाणुतत्त्वे ततः पश्चाद्वाऽभेदत्वमस्ति। तदेव परमाणुतत्त्वं सूक्ष्मविज्ञानान्तर्गतम्। पञ्चमहाभूतानां स्थूलरूपेषु यद्यपि भिन्नधर्मत्वं प्रतिभाति सूक्ष्मे त्वभेदत्वमेकधर्मत्वम्वा भवति। अभेदत्वमेव ज्ञानं सत्यम्वा महाविज्ञानम्वा ज्ञेयम्-"सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते"[2] "सर्वं सत्ये प्रतिष्ठितम्"[3] इत्यादि वचनात् सर्वस्यास्याखिलस्य ज्ञानं सत्यम्वा मूलमेव व्यपदिष्टम्।

आकाशं व्याप्तिमत् सूक्ष्ममनन्तञ्च। वायुः सर्वत्रगामी तस्मादुपादानाभास स्तत्रानुभूयते। तेजोऽपि सर्वगामि, प्राधान्येन तूर्द्धगामि तत्रोपादानं रूपत्वाद् दृश्यते। अग्नौ तेजस ऊर्ध्वगमने प्राधान्यं लक्षणीयम्। जलमधोगामि पार्श्वगामि च; परन्तु तेजसा सार्द्धमूर्द्धगमनमपि लक्ष्यते। क्षितिः स्थिरा, वारिणा तेजसा वायुना

Vijnana Bharati

चास्याः संचालनं परिलक्ष्यते। आकाशं सूक्ष्मं क्षिति स्थूलतमा। एतेषां महाभूतानां संयोगेन पारस्परिकक्रियया चास्या जीवगगतो सञ्चालनम्वा भवति। जीवजगतः प्रसङ्गे श्रीमद्भागवते यथा- "तेजोवारिमृदां यत्र विनिमयः" इति। तेजसोऽग्नेर्वा प्राधान्यं देवयज्ञेषु "अग्नि वैं यज्ञदूतोऽङ्कतः" इति ऋग्वचनात्। जलस्यापाम्वा प्राधान्यं पितृयज्ञेषु "पिण्डोदकतर्पणकर्मसु" विद्यमानात् तथा च मृदुद्गतैरन्नैर्वस्तुभिर्वा नृयज्ञ-भूतयज्ञादीनां सम्पादनं परिलक्ष्यते। एते महाभूताः "भूर्भुवःस्वरि"ति व्याहृतिभिः समन्वितत्वात् महाकाशस्य प्रथमस्त्रिस्तरसम्बन्धिनोऽर्थाद् भूमण्डलमन्तरिक्षं स्वर्गश्च युगपत् वेदविज्ञानेन सम्बध्यन्ते। एतेषां त्रिलोकानामधिमपतिर्हि देवराजः (इन्द्रदेवता) वेदेषु बाहुल्येन स्तुतः।

पृथिवीपृष्ठतः सप्तयोजनपर्यन्तं परितः खेमण्डलं भूमण्डलम् - अत्र तेजोवारिमृदां विनिमयो वायुना संचाल्यते। अत्रैव कव्यनामकाः पितरो निवसन्ति भूमण्डलादूर्ध्वं परितो यावच्चन्द्रमास्तावदन्तरिक्षं भुवलोको वा, यत्र अङ्गिरसः पितरो निवसन्ति, सप्तक्षीरोदादयोऽर्णवाः सन्ति। यत्र क्षितिं विहाय वारितेजोवायूनां विनिमयो भवत्येव। चन्द्रमसो दूरं यावत् सूर्यः पृथिव्याः परितः खं स्वर्गं स्वरिति व्याहृतिपदं ज्ञेयम् । अत्र देवा ज्योतिषा ऋक्कनामकाश्च पितरः छायया निवसन्ति विराजन्ते वा। तथाहि- मातली कव्यैर्यमो अङ्गिरोभि बृहस्पति ऋक्कभिर्वावृधानः। यांश्च देवा वावृधुर्येच देवान्त् स्वाहान्ये स्वधान्ये मदन्ति।।[4]

अत्रतु क्षित्यापो विना तेजोवाय्वोर्विनिमय एव ज्ञेयः अत्रैव सौरपरिवारस्य ग्रहा उपग्रहा नियतं संचरन्ति। एतावदाकाशे भूर्भुवः स्वरिति व्याहृतिभिः परिकल्पितो जीवगतागतानां त्रिलोकानां प्रथमः स्तरः (First region of eternal space). वेदेषु सोमदेवता आकाशतत्त्वे, वायुदेवता वायुतत्त्वे मित्रवरुणोपेतः सूर्यो युगपत् तेजसस्तथा च जलस्य तत्त्वे, अग्निः केवलं जलतत्त्वे तथा च पृथिव्यादयः स्थूलभूतास्तत्तदभिमानिदेवतत्त्वेन क्षितितत्त्वे विज्ञानतः स्तुता इति परिलक्ष्यन्ते। सत्यवादिन ऋषय एव तत्र तत्र मन्त्रद्रष्टारः। अतो वेदगताः स्तुतयो मन्त्राणि वा विज्ञानेन परिपूर्णानि नात्र संशयः।

स्वर्लोके सूर्यमण्डलपरिवारे ग्रहा उपग्रहाश्च सूर्यकिरणैः रश्मिभी रज्जुभिर्वाबद्धाः स्वस्वमण्डलैर्महाकाशे भासमाना नियतं सूर्यं केन्द्रीकृत्य चरन्ति यथा पृथिवी भूमण्डलपक्षेन महाकाशे भासमाना सूर्यस्य सप्तरश्मिभिर्वद्धा नियतं सूर्यस्य परितश्चरति। यथा वा शकुनिपक्षी स्वपक्षं प्रसार्य आकाशे विना प्रयत्नेन भासमानो नियतं परितः चरतीति दृश्यते। पक्षी स्वपक्षं प्रसारयति संकुचति तद्वत् पृथिव्यपि भूमण्डले वायुतेजोवारिमृदां विनिमयेन स्थितानि उपादानानि स्वसम्बन्धीनि प्रसारयितुं संकुचितुं वा शक्नोति। तेनैव हेतुना कदाचित् कुत्रचिद्वा भूकम्पनं परिलक्ष्यते। स्वतो निर्गतानामेवाकर्षणमस्ति तदेव माध्याकर्षणम्। चन्द्रः पृथिवीत उद्भूत इति कथा वेदेषु पुराणेषु न विद्यते। अतश्चन्द्रः पृथिव्या आकर्षणे स्थित इति न युक्तम्। तद्वत् छायासुतं मन्दं (शनैश्चरम्) विना कोऽपि ग्रहः सूर्यात् सम्भूत इति कथा वेदेषु पुराणेषु न विद्यते प्रत्युत पृथिवी माता, अत्रिसुतः सोम, मङ्गलो भौमः, सोमपुत्रो बुधः, अङ्गिरापुत्रो वृहस्पतिः, भार्गवः शुक्रः, सैंहिकेयो राहुरिति स्पष्टतो विद्यमानाद् एते ग्रहाः सूर्यरश्मिभिर्युक्ता अपि सूर्येण आकर्षिता इति न युक्तम्। वरमेते ग्रहाः सूर्यसम्बन्धिनः स्वतो भासमाना नियतं चरन्तीति भागवतेऽपि व्यपदिष्टम्। सूर्यस्य प्राधान्यं कुत्सर्षिणा यथा दृष्टम् -

चित्रं देवानामुदगादनीकं चक्षु र्मित्रस्य वरुणस्य चाग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च।।[5]

अत्र सर्वेषां देवानां मुखं सूर्य इति, जीवेषु कारणभूतानां मित्रवरुणाग्नीनां प्रधानाङ्गं चक्षुरिति सूर्यो दृष्टः। सूर्यः स्वस्फुरितैः रश्मिभिर्द्यावापृथिवी अन्तरिक्षं किरणैस्तापैश्चैव पूरयति, स एव स्थावरजङ्गमानामात्मेति दृष्टः। वैज्ञानिकदृशा तु सूर्यस्य वेदगतानि सप्तछन्दांसि सप्तरश्मयो रज्जवो वा सन्ति। तैर्भूमण्डलं पृथिवीसमेतं सूर्यः स्पृशति बध्नाति वा। रज्जौ बद्धौ वृषभो यथा केन्द्रीकृतं कीलकं परितो नियतं चरति तद्वत् किरणैस्तापैश्च बद्धं भूमण्डलं सूर्यं केन्द्रीकृत्य नियतं परितश्चरति। "सूर्यो रूपं कृणुते द्यौरुपस्थे" इत्यनेन अदितिलोकस्य महलोकस्य वा उपस्थेऽर्थात् स्वर्गेऽन्तरिक्षे वा सूर्यो मित्ररूपं वरुणरूपञ्च करोतीति दृष्टः। पुराणेष्वपि सूर्यमित्रवरुणां द्वादशादित्येषु परिगणिता। अन्तरिक्षे सूर्यस्य किरणं स्निग्धं परन्तु वायुतेजो वारिमृदां संयोगेन तापयुक्तं भवति।

द्यावापृथिवी वै रोदसी क्रन्दसी वा। द्यौ पिता पृथिवी माता इति वेदवचनात्। पिता वीर्यदो माता वीर्यधारिणीति लोकतः सन्ततौ प्रसिद्धत्वाद्। भूलोकतो द्यौपर्यन्तमाकाशेऽष्टदेवसर्गाणां नवममानुषसर्गस्य तथा च पञ्चतिर्यग्योनीनां रोदनं क्रन्दनं वा वर्त्तमानाद् रोदसी क्रन्दसी वेति। अत्रैव भूर्भुवःस्वरिति व्याहृतीनां क्रिया प्रभावो वा परिलक्ष्यते। अत्रैव प्राधान्येन वेदविज्ञानं निहितम्। रोदनं क्रन्दनं वा शब्दस्यैव प्रकाशनम्। एतेनैव शब्देन सूक्ष्मात् क्रमशः स्थूल- स्थूलतर-स्थूलतमाः प्रवृत्तयः बभूवुरिति भावः। अतो द्यावापृथिवी रोदसी इति। सूर्यस्य मण्डलात् परिवारादूर्ध्वं यावत् सप्तर्षिमण्डलं तावत् परितो महाकाशे महलोकोऽदितिलोको वा द्यौ द्यावा वेति शब्देन व्यपदिश्यते। एष महाकाशे द्वितीयस्तरः (Second region of the eternal space) अदितेः पुत्रः कश्यपात् सूर्यआदित्य इति वेदेषु पुराणेषु निगदनात् ।

यत्तु शक्रितम् शब्दं वागित्यभिहिता-सा दिवि महलोके वा सूक्ष्मरूपा स्वर्लोके छन्दसा विवर्त्तमाना, अन्तरिक्षे छन्दसा स्थूला, भूमण्डले स्थूलतरा भूलोके स्थूलतमा छन्दो रहिता वा। सर्वत्रैव

Vijnana Bharati

तस्या वाचः प्रभावो वा शक्तिर्वा परिलक्ष्यते मूल्यबोधव्यवधानेन। यथा स्वर्लोके छन्दोमयी शुद्धा वाङ्न तथाऽन्तरिक्षे अन्तरिक्षादपि भूलोके वेदवाणी अधिकतरेण दूषिता। सा वेदवाणी अत्रैव शुद्धयते चेत्तर्हि पूर्णमूल्यतां याति यथा पापदेहे समासीनो जीवः पूर्णतः शुद्धो भूत्वा मुक्तो भवति-तथाहि-

यथैव सुवर्णादिक्षारादेः शोधितं शुभम् ।
पूर्ववन्मूल्यतां याति तथा जीवोऽपि संस्कृतः।।[६]

यद्वा क्षितिरप्सु लीयते आपस्तेजसि लीयन्ते तेजो वायौ लीयते वायुराकाशे लीयते इत्यादिभिर्यत्र यत्र लीयते तस्य तस्यैव शक्तेराधिक्यं स्वीकरणाद् आकाशं सर्वशक्तिः। अत शब्दो वा वागपि आकाशगुणत्वात् सर्वशक्तिमती। सा सर्वभूतान् भूतजांश्च चालयितुं शक्ता नात्र संशयः। शुद्धपात्रतो निर्गता शुद्धा वागेवात्रापेक्षते। श्रूयते हि-शुद्धत उच्चारितेन वेदमन्त्रेण वायोः प्रवहनम् अग्नेरुत्पादनं वरुणस्य वर्षणमिति। "स्वर्गकामो यजेत", "पुत्रकामो यजेत" इत्येवं व्यपदिष्टेभ्यो यज्ञेभ्यो वेदवाण्यैव तत्तत् फलप्राप्तिरभवदिति। अतो वेदविज्ञानं शुद्धवाक्सापेक्षम् सत्यसन्धानामृषीणां वाचैव स्वर्गामिन-स्त्रिशङ्कोरन्तरिक्षेऽवस्थानं तथा च शापवरप्रदानानि सिद्धयन्ति चेत्तर्हि वाक्शक्तिरेव सर्वशक्तिमती ज्ञेया या त्रिलोकगोचरा। अत्रोदाहरणमेकम् – "राम इहागच्छ" इति वाचा सदेहजीवो रामसंज्ञक आगच्छति "श्यामस्तत्र गच्छ" इति वाचा सदेहजीवः श्यामसंज्ञको गच्छति चेत्तर्हि वाचा शब्देन वा प्रवृत्तीनां सञ्चालनं भवितुमर्हति तत्र न संशयः। अत उक्तम् –

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी वाणी यस्मात् सर्वाः प्रवृत्तयः।।

शब्दगुणमाकाशम् । शक्तिमदर्थयुक्तं विशेषभावयुक्तं शब्दं वाग्भवति। अनन्ताकाशेन सर्वं परिव्याप्तमतो वाचाऽपि विशेषभावानामर्थानां महाभूतानां तत्तद्गतानां चराचाराणां स्फुरणं स्पन्दनं विक्षेपणं जननं क्रियते नात्र संशयः।

अनन्ताकाशे अदितिलोकेन परिवृतो ग्रहादिभिः समन्वितः सौरपरिवारो ज्योतिःपुञ्जवत् सञ्चरति यथा मेघखण्डा आकाशे सञ्चरन्ति। नित्यया वेदवाण्यैव तत् प्रवर्त्तनं भवति। सौरपरिवारे सर्वेष्वपि ग्रहेषु तत्तत्परिवेशगता जीवा व्यक्ताव्यक्तरूपेण सन्ति। तेषु पृथिवीपरिवेशगतानां जीवानां निवसनकल्पना निरर्थका न संभावनीया यथा जलचराणां निवसनं स्थलेषु असंभवमेव प्रतिभाति। परन्तु मङ्गलग्रहो भौमोऽर्थाद् भूमेरपत्यमिति पुराणेषु व्यपदेशात् तत्रैव केवलं पार्थिवजीवकल्पना भवितुमर्हति। पक्षान्तरे चन्द्रः पृथिवीसंभूत इतिकथा वेदे पुराणेषु न विद्यते। प्रत्युत अत्रिसुतः सोमः सूर्यादपि प्राग्जातो दक्षशापेन क्षयीभूतो भष्मवान् निष्प्रभो द्युलोकतो भ्रष्टोऽन्तरिक्षस्थो ज्ञेयो भगवता सोमनाथेन उज्जीवितः कलानां ह्रासवृद्धौ विहितः। स पितृणां प्रतिभूस्तत एव पार्थिवजीवानां पुनरावृत्तिरिति गीतायामपि भगवतोक्तम् – "तत्र चान्द्रमसं ज्योति योगी प्राप्य निवर्त्तते"।[७]

एष सोमोऽन्तरिक्षे महाभूतोपादानानां सूक्ष्मप्रतिभूरेव – यथा घृतोपादानं दुग्धे तिष्ठति। घृतं ज्वलति दुग्धं न ज्वलति। चन्द्रो भौतिकजीवप्रवृत्तिरहस्ये सोमतत्त्वरूपो ज्ञेयः। यद्वा वेददृशा सोमयागे सोमरसप्रणयने शुष्कप्रायेषु सोमलतासक्तुसु इन्द्र-वायु-मित्रवरुणस्तुतिभिः सोमरस उपजायते। तद्वेदवाण्यैव सत्यवाचा वा सम्भवति। यतः सत्यपूता वेदवाणी सर्वशक्तये सर्वार्थसिद्धये स्थिता। अतः शान्तिपाठेषु ऋषिभिरेवं संकल्पितम् – "ऋतं वदिष्यामि सत्यं वदिष्यामीति। दिवाभागे ज्योतिषा सूर्यो देवानां प्रतिभूरूपेण स्वर्गान्तरिक्षयो र्मध्ये स्थितः। तस्मादेतौ भौतिकजीवानां कारणभूतौ साक्षिमन्तौ च।

भवतु नाम दक्षशापप्रागवस्थायां चन्द्रो दिवि (महलोके) सोमदेवता आसीदिति संकेतो वेदेषु पुराणेषु चोपलभ्यते। दक्षस्य परिचितिर्द्विविधा- ब्रह्मणः पुत्ररूपेण प्रचेतसां पुजरूपेण च, यथा भगवतो महेश्वरस्य परिचितिर्ब्रह्मणो जनकरूपेण पुत्ररूपेण च क्रियते- उभयत्रापि गुणतोऽभेदत्वं तद्वत् दिवि यः सोमः स एवान्तरिक्षे चन्द्र इति गुणतो प्रतिभाति।

सृष्टिप्राप्तये जन-तप-सत्येति क्रमश ऊर्ध्वस्थानां त्रिभुवनानामर्थाद् अनन्तआकाशस्य तृतीयस्तरस्य (Third region of eternal space) प्रतिबिम्बनमनन्ताकाशस्य द्वितीयस्तरे ऽर्थाददितिलोके (महलोके) भवति। अत्रैव चतुर्दशसृष्टीनां बीजं कारणं वा निहितम्। जनलोको महलोकं परिवृत्य तिष्ठति। तत्र ब्रह्मणः सुता ऋग्वेदस्य वंशमण्डलगतमन्त्रद्रष्टारो अत्रिप्रमुखाः सप्तर्षयः सृष्ट्यर्थं वेदध्वनिना सप्तरहस्यं वितवन्तो द्याम् विडम्बयन्ति। सृष्टौ सप्तरहस्यं तु- १- सप्तस्वर्गाः, २- सप्तर्षयः, ३- सप्तग्रहाः, ४- कालमूर्तेः सप्तावरणरूपा सप्तदिवसाः, ५- सप्तपातालानि, ६- सप्तप्रकृति-विकृतयः,७- सप्त छन्दांसि, ८- सूर्यस्य सप्तरश्मयः, ९- सप्त सामस्वराः, १०- मरुत् सप्तसप्तधा, ११- अग्निः सप्तशिखः, १२- सप्तसागराः, १३- सप्तद्वीपा वसुन्धरा, १४- सप्तध्वनयो वाङ्मूर्त्तेः, १५- सप्तसरितः, १६- सप्तकुलपर्वताः, १७- सप्तावरणेन युक्तो जीवदेहः, १८- सप्तधातुमयं शरीरं, १९- सप्तप्रधानसन्धयो देहस्य, २०- सप्तमासेन पूर्णाङ्गो भवति गर्भः, २१- यज्ञेषु च सप्तसामधेन्यः, २२- सप्तकुलप्रसंङ्गः - एवं वेदवाण्या सृष्टेः प्रवर्तनद्योतका जनलोकस्थाः सप्तरहस्यमया एते ऋषयः।

अत उक्तम् - युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।

Vijnana Bharati

तपसा लेभिरे पुनः पूर्वमनुज्ञाता स्वयम्भुवा।।

जनलोकादूर्ध्वं तपोलोको जनलोकं परिवृत्य तिष्ठति। तत्राष्टाशीति सहस्राणि ऊर्ध्वरेतसः सनकप्रमुखैश्चतुःकुमारैस्तिष्ठन्ति। ते सृष्टेर्निवृत्तमार्गिनः। तपोलोके सत्यलोकेनावृतो ॐ इति एकाक्षरशब्दब्रह्मणा त्रिनाथतत्वसूचकेन त्रिगुणभावविडम्बनेन।

असाति सदारोपत्वेनैव (Existence of the nothingness) तिष्ठति। तपःसत्यौ असदिति (nothingness) भावारोपाद् विज्ञानस्यागोचरम् भवति। अत्र तु नादबिन्दुसमेतस्य प्रवृत्तेः कारणकारणरूपस्य प्रणवध्वनेरेव स्थितिः। अत उक्तम् – "देवानां पूर्वयुगे तात असतः सदजायत" एवमनन्ताकाशस्य सप्तभुवनानि त्रिषु स्तरेषु बिभाज्यानि। प्रथमस्तरे (In the first region) देवादीनां स्थावरजङ्गमानामवस्थानम् सत्त्वम्वा (Existence) भूर्भुवःस्वरित्येन व्यपदिष्टम् । द्वितीयस्तरे (In the second regions) महलोके दिवि वा सदसतोः विडम्बनम् (contamination of existence & nothingness) तृतीयस्तरे तु असतः सद्भावारोपप्रतीतिरेव (concept of existence in nothingness) ॐकारध्वनिना अवस्थानम् । तथाहि–

त्रिकद्रुकेभिः पतति षडुवीरेकमिद् वृहत् ।

त्रिष्टुपगायत्री छन्दांसि सर्वा स्ता यम आहिताः।।<sup></sup>

अत्र एकं ब्रह्म शब्दब्रह्म वा सत्यलोके त्रिगुणात्मकं त्रिगुणै-स्त्रिनाथतत्वै र्वा 'तपोजनमहस्वरभुवर्भूरिति षडुर्वीःपततीति भावः। शब्दब्रह्मणा वेदवाण्या वा कृत्स्नमिदं जगत्प्रवर्त्तनम् आवर्त्तनम् वा भवति – एतदेव वेदविज्ञानम् ।

अनन्ताकाशं शक्तिमत् वाक् तत्र शक्तिमती। महाभूतानामुपादानं यावत् स्थूलं भवति तावदभिव्यक्तिर्भवति। स्थूलानामेव विषमशक्तिसापेक्षात् सीमितशक्तेरवभासात् परस्परजनोपरति–विकारादिदोषः परिलक्ष्यते। स्थूलतः सूक्ष्माणां शक्तेराधिक्यं सर्वत्र सिद्धाद् भूमण्डले महाभूतानां यथा स्थितिर्न तथाऽन्तरिक्षे न च तथा स्वर्लोके स्थितिर्भवति। याष्काचार्येणापि अग्नेस्त्रिलोकेषु स्थितिर्भिन्नतः प्रदर्शिता। आकाशं सूक्ष्मतमम् । तस्य शक्तिप्रसङ्गे किञ्चिदुच्यते –

शिलचरनगरे निश्छिद्रमन्तः शून्यं लौहपञ्जरं (Iron Box) सुष्ठु निर्माय तत्पञ्जरं मया वाराणसीमानीतम् । शिलचरनगरे यथा लौहपञ्जरस्थमाकाशमासीत् तथा वाराणस्यामपि लौहपञ्जरस्थ-माकाशमस्ति। तर्हि लौहपञ्जरेण शिलचरनगरस्थमाकाशमानीतम्वा नानीतम्वा? नानीतमेव सत्यं यतो लौहपञ्जरेऽधुना वाराणसीस्थ-माकाशमेव तिष्ठति। एवं चेत्तर्हि आकाशस्य सूक्ष्माशक्तिरलौकिकी शक्तिर्वा लौहावरणं भित्वा भित्वा तत्रतत्रस्थमेवाकाशं निश्चलमेव उपस्थापयतीति विचार्यम्। तदाकाशस्थः सूक्ष्मवायुरपि तत्र तत्र तत्सङ्गेन तिष्ठति। एवं भूर्भुवः स्वर्लोकेषु महाभूतानां सूक्ष्मत्वं स्थूलत्वं वा विचार्यम् ।

एतावद् भूतविज्ञानं ज्योतिर्विज्ञानं चाधिकृत्य किञ्चित् किञ्चिदुक्तम् अधुना तु रसायनोद्भिद्विज्ञानमधिकृत्य किञ्चिदुच्यते – तेजोवारिमृदां विनिमये रसायनविज्ञानम् भवति। यत्तु वेदे सोमतत्त्वं यद्वा पुराणेषु सप्तसागररहस्यं निगदितं तदपि महाकाशस्य त्रिस्तरसम्बन्धि। तत्रान्तरिक्षे रसाशेऽव्यक्तरूपेण सप्त क्षीरोदादिषु सागरेषु तिष्ठन्ति। एते रसाः पितृसम्बन्धिनो भूलोकगामिनो भूलोकस्थेषु च सम्बन्धिनो भवन्ति। अत्रोदाहारणमेकं दीयते – कस्मिंश्चित् समे सन्निकटभूभागे १– निम्बबीजं २– आम्रबीजं ३– हरितकीबीजं ४– इक्षुबीजञ्च समकाले हस्तपरिमितान्तरेण रोप्यन्ते। तत्र तत्तद्बीजगता वृक्षा वर्द्धन्ते फलन्ति च। समा भूमिर्भूरसः समः सममेव तेजस आपतनं समो वायुप्रवाहश्च तत्र वर्त्तन्ते। परन्तु फलतः निम्बं तिक्तम् आम्रं कटु हरितकिः कषाय इक्षुश्च मधुरं भवन्ति। एतेषां पृथग् रसानां कारणं हि भुवर्लोकस्थाः सागराः स्वर्लोकस्थं सोमतत्वम् ।

यत्तु व्याधिनिरसनविज्ञानं शरीरविज्ञानम्वा (Medical Science) परिगण्यते तत्रापि महाकाशस्य त्रिस्तरीयप्रभावो विद्यते। व्याधीनां मूलं तु महाभूतदूषणमेव पापम्वा। नियतप्रकृतिगतध्वनीना-मभावे कृत्रिमध्वनीनामाधिक्ये शब्ददूषणमाकाशदूषणम्वा भवति। भावदुष्टतया प्रमादेन वा अपकर्मणा वा दुर्गन्धादिभिर्वा देहस्थानां पञ्चवायूनां तथा च बहिस्स्थस्य वायोर्दूषणम् भवति। वैश्वानराग्नौ वा अभक्ष्यं पतति चेद् अग्नौ अपवित्राणि वस्तूनि पतन्ति चेद् सूर्यादिषु देवेषु हेलनं भवति चेत् तेजसो दूषणं भवति। जलदूषणं मृद्दूषणमपि वा प्रत्यक्षतोऽनुभूयते।

नादबिन्दुयुक्तेन ॐकारध्वनिना तथा च शङ्खघण्टावंशि-मृदङ्गादीनां ध्वनिना शब्ददूषणं निरातर्त्तुं शक्यते। नवमङ्गल-ध्वनयोभवन्ति एते सूक्ष्मा ध्वनयो भूर्भुवःस्वर्लोकेषु त्वरितगामिनो भवन्ति। एतेषां प्रभावेन भूमण्डलगता व्याधिमूला जीवादयो नश्यन्ति। शब्ददूषणपराभूतत्वात्। अन्तरिक्षेऽसन्तुष्टा निरालम्बाः पितरोऽपि व्याधेः कारणम् । स्वर्लोकस्था देवाः सुखदुःखयोः कारणम् । देवेषु पितृषु श्रद्धाशीला एव साधारणतो मङ्गलध्वनिकारका भवन्ति। देवान् पितॄन् चोद्दिश्य कृतवेदध्वनिभिः, शुभनामसंकीर्त्तनादिभिर्वा देवाः पितरश्च सन्तुष्टा भवन्ति शब्ददूषणनिराकरणात् । अतो वेदे देवकर्मसु पितृकर्मसु वा – "ॐद्यौ शान्तिरन्तरिक्षशान्तिरित्यादि पठ्यते। दुर् (दुष्टम्) खम् आकाशम्वा दुःखम्। सु (सुष्ठु) खमाकाशम्वा सुखम् । अतएव सुखदुःखयोर्मूलमेवाकाशम्।

वायुदुषणाद् व्याधिर्भवति। देहचारिणः पञ्चवायवः सप्रणवव्याहतिबीजमन्त्रैः समं प्राणयामेन शुद्ध्यते चेद् व्याधिमुक्ति-

Vijnana Bharati

र्भवति नात्र संशयः। अग्नौ ष्ठिवनं मूत्रपुरीषादीनां संयोजनं वा क्रियते चेत्तर्हि तेजोदूषणम् भवति। तत्तु होमक्रियादिभिः सूर्यादीनुद्दिश्य कृतस्तुतिभिस्तेजोदूषणं निराकर्त्तुं शक्यते। ततो व्याधिमुक्तिरुपजायते। अपि च व्याधिमूलस्य पापकर्मणः निराकरणे प्रायश्चित्तविषयककर्मसु अथर्ववेदसंहितायाम् "पापमोचनम्" नाम कानिचित् सूक्तानि सन्ति। तेष्वपि अग्नि-सवितृ (सूर्य)-वायुदेवताः प्राधान्येन स्तूयन्ते। एवं वेदे सर्वत्रैव वाक्शक्तेर्ध्वनेर्वा आकाशस्य वा प्रसङ्गः प्राधान्येन प्रदर्शितः।

नरदेहस्मिन् महाकाशस्य त्रिस्तरीयसप्तभुवनानां सम्बन्धः प्रतीयते नाभिर्भूमण्डलसम्बन्धिनी, उदरमन्तरिक्षसम्बन्धि, वक्षः स्वर्लोकसम्बन्धि, इत्येवमनन्ताकाशस्य प्रथमस्तरसम्बन्धः। ग्रीवा द्यौलोकसम्बन्धिनी (महलोक) एषोऽनन्ताकाशस्य द्वितीयस्तर-सम्बन्धः। वदनं जनलोकसम्बन्धि यत्र सप्तर्षीणां प्रतिभुवः - द्वे अक्षिणी द्वे कर्णे, द्वे नासिके मुखमेकमिति सप्त तिष्ठन्ति। तदूर्द्ध्वं ललाटं तपोलोकसम्बन्धि तदूर्ध्वमूर्द्धा सत्यलोकसम्बन्धि इत्येवमनन्ताकाशस्य तृतीयस्तरसम्बन्धः। सम्बन्धोऽयं तिर्यग्योनिष्वपि इषद्विकृतेन परिलक्ष्यते। सम्बन्धोऽयमीषद्विलक्षणेन पितृषु देवेष्वपि विद्यते; परन्तु तदस्माभिर्न दृश्यते। जलेषु कार्यकारिणा चक्षुषा जलचराः स्थलगतानि वैचित्राणि न पश्यन्ति तद्वद् वयमपि मदीयचक्षुषा अन्तरिक्षस्थानि स्वर्गतानि च वैचित्रानि द्रष्टुं न शक्नुमः सर्वं शून्यं पश्यामः। अतो भगवता कृष्णेन विश्वरूपदर्शनप्रागर्जुनाय प्रोक्तम् - दिव्यं ददामि ते चक्षुरिति। अन्तरिक्षेऽपि सप्तद्वीपाः सप्तसागराः सन्तीति शिवमहापुराणेऽप्युक्तम् -

मण्डलं च भुवः सम्यक् सप्तद्वीपादिसंयातम् ।
जम्वुः प्लक्षः शाल्मलिश्च कुशः क्रौञ्चश्च शाककः।।
पुष्पकः सप्तमः सर्वे समुद्रैः सप्तभिर्वृताः।।[९]

परिवेशव्यवधानादस्मदीयचक्षुरेतान् द्रष्टुं न शक्नोति यद्यपि एते सन्ति।

इन्द्रो वेदेषु बाहुल्येन स्तुतः। स प्रधानादित्यस्त्रिलोकाधीशो देवराज इति वेदेषु पुराणेषु निगदितः। इन्द् धातु स्वतः स्फुरणे द्योतनायां शक्तौ व रक् प्रत्यययुतेन। इन्द्रशब्दस्य निर्वचनं भवति। स शक्रनामापि भवति शक्धातुरक्प्रत्यययुगेन। स द्यावापृथिवी अन्तरिक्षञ्च स्फुरयति द्योतयति वा तत्र यत् किमपि कर्त्तुं शक्नोति वेति व्यपदिष्टम् - "यस्य शुष्माद्रोदसी अभ्यसेताम्"[१०] अपि च

यः पृथिवीं व्यथमानामदृंहत् यः पर्वतान् प्रकुपिताँ अरम्णात्।
यो अन्तरिक्षं विममेगरीयो यो द्यामस्तभ्णात् स जनास इन्द्रः।।[११]

तथा च "यःसूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः"[१२] इत्यादिभिरनन्ताकाशे प्रथमद्वितीयस्तरयोर्मध्ये इन्द्रस्य शक्तेः प्राधान्यम् प्रदर्शितम् । "यः सूर्यं जजान इत्यनेन सूर्यस्यानन्तस्फुरणे इन्द्र एव कारणम् । अनन्ताकाशस्य तृतीयस्तरस्य प्रतिबिम्बनेन विडम्बितां द्याम् (अदितिलोकम्) नियमिताम् इन्द्रश्चकार 'द्यामस्तभ्णादित्यनेन' व्यपदिश्यते। वैज्ञानिकदृशा कः स इन्द्रः? इत्यपेक्षायामुच्यते- "स वाग्वज्री यजमानं हिनस्ति" इति महाभाष्यवचनेन वाग् एव वज्री अर्थाद् इन्द्रो भवति। अनन्ताकाशस्य तृतीयस्तरस्य या नित्या वाग् ध्वनिर्वा द्यामावृणोति तस्या वा तस्यैव स्फुरको द्योतको भावप्रतीतिरिन्द्रः। अत इन्द्रस्त्रिलोकाधीशः।

सूर्यः सवितृदेवता जगतस्तस्थुषश्च आत्मेति प्राग् उल्लिखितः। अनन्तप्रसवने सत्यपि तस्य क्षयो न भवेद् यावद् नित्याया वाचः प्रभावः स्यात् । वेदवागेवानन्ताकाशस्य प्रथमस्तरे भुर्भुवःस्वर्लोकेषु नित्याया वाचोऽभिव्यक्तिर्या स्वरैरुदात्तादिभिर्युक्ता मनुष्यलोके। स्फुर्यते स्वर्यतेऽक्षरोऽनेनेति स्वरः, स्वरेष्वपि प्रधानमुदात्तम् यमधिकृत्यैव वेदार्थो निर्णीयते। उद् (उपरि) आत्तम् उदात्तम् (acute accent) सूक्ष्मं शिरोगतमूर्ध्वगामिस्वरः। उदात्तप्रमुखैः स्वरैर्विहितानां शब्दानामेव कार्यकारिता त्रिलोकेषु यथोपलभ्यते न तथा स्वररहितमनुष्यशब्दानाम्। यथा भेकानां पशूनां पक्षिणाञ्च शब्दा श्रूयन्ते तेषामर्थास्माभिर्नज्ञायन्ते तद्वत् स्वरविहीना मनुष्यभाषा पितृभिर्देवैर्वा न ज्ञायते। अतो वेदमयी वाणी त्रिलोकगोचरा यया जीवहितं साधयामः - एतद्धि महाविज्ञानम् अनन्ताकाशसम्बन्धि। उदात्तानुदात्तस्वरितप्रचितनिघाताः स्वरा यदि यथायथं मन्त्रदृशा उच्चार्यन्ते विनियुज्यन्ते चेत्तर्हि तेषां फलमद्यापि भवितुमर्हति।

देहदेहिसम्बन्धेन जीवो भवति तद्वद् वाय्वाकाशयोः सम्बन्धेन वागुत्पत्तिर्भवति तथाहि- वायुशरीरसमीरणात् कण्ठोरसः सन्धाने वागुत्पत्तिरिति (तै.प्रा.) वेदवाण्यामुदात्तप्राधान्यात् सूक्ष्मत्वेन ऊर्ध्वगमनशीलत्वाद् वेदविज्ञानमनन्ताकाशस्य त्रिस्तरसम्बन्धि ज्ञेयमिति शम्।।

*सन्दर्भ :*


१. गी३।।११

२. गी ४/३३

३. शि. महापु. ५/१२

४. ऋ.सं १०-१४/३ इति वचनात्

५. ऋ.सं १/११४/१

६. शि.महापु ४-४३-२५

७. गी ८ २५।।

८. ऋ.सं १०-१४-१६

९. शि. महापु ५-१७-१/२

१०. ऋ सं २/१२/१

११. ऋ सं २/१२/२

१२. ऋ. २/१२/७